# .. shARadAShaTkastotram ..

# ॥ शारदाषट्कस्तोत्रम् ॥

## Sanskrit Document Information

Text title : shAradAShaTkastotram

File name : shAradAShaTkastotram.itx

Category : ShaTkam

Location : doc_devii

Author : nRisiMhabhAratIsvAmi

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 10, 2017

*sanskritdocuments.org*

# ॥ शारदाषट्कस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

वेदाभ्यासजडोऽपि यत्करसरोजातग्रहात्पद्मभूश्चित्रं
विश्वमिदं तनोति विविधं वीतक्रियं सक्रियम् ।
तां तुङ्गातटवाससक्तहृदयां श्रीचक्रराजालयां
श्रीमच्छङ्करदेशिकेन्द्रविनुतां श्रीशारदाम्बां भजे ॥ १॥

यः कश्चिद्बुद्धिहीनोऽन्यविदितनमनध्यानपूजाविधानः
कुर्याद्यद्यम्ब सेवां तव पदसरसीजातसेवारतस्य ।
चित्रं तस्यास्यमध्यात्प्रसरति कविता वाहिनीवामराणां
सालङ्कारा सुवर्णा सरसपदयुता यत्नलेशं विनैव ॥ २॥

सेवापूजानमनविधयः सन्तु दूरे नितान्तं
कादाचित्का स्मृतिरपि पदाम्भोजयुग्मस्य तेऽम्ब ।
मूकं रङ्कं कलयति सुराचार्यमिन्द्रं च वाचा
लक्ष्म्या लोको न च कलयते तां कलेः किं हि दौःस्थ्यम् ॥ ३॥

दृष्ट्वा त्वत्पादपङ्केरुहनमनविधावुद्यतान्भक्तलोकान्
दूरं गच्छन्ति रोगा हरिमिव हरिणा वीक्ष्य तद्वत्सुदूरम् ।
कालः कुत्रापि लीनो भवति दिनकरे प्रोद्यमाने तमोवत्
सौख्यं चायुर्यथाब्जं विकसति वचसां देवि शृङ्गाद्रिवासे ॥ ४॥

त्वत्पादाबुजपूजनाप्तहृदयाम्भोजातशुद्धिर्जनः
स्वर्गं रौरवमेव वेत्ति कमलानाथास्पदं दुःखदम् ।
कारागारमवैति चन्द्रनगरं वाग्देवि किं वर्णनैर्दृश्यं
सर्वमुदीक्षते स हि पुना रज्जूरगाद्यैः समम् ॥ ५॥

त्वत्पादाम्बुरुहं हृदाख्यसरसि स्याद्रूढमूलं यदा
वक्त्राब्जे त्वमिवाम्ब पद्मनिलया तिष्ठेद्गृहे निश्चला ।
कीर्तिर्यास्यति दिक्तटानपि नृपैः सम्पूजिता स्यात्तदा
वादे सर्वनयेष्वपि प्रतिभटान्दूरे करोत्येव हि ॥ ६॥

इति श्रीजगद्गुरुनृसिंहभारतीस्वामिविरचितं शारदाषट्कस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shAradAShaTkastotram ..
was typeset using XƎLaTeX 0.99996
on February 10, 2017

Please send corrections to *sanskrit@cheerful.com*